श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ वेदादि शाट्रुमुऱै ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ वेदादि शाट्रुमुऱै ॥

## तैत्तिरीय संहिता 7-5

स॒मु॒द्र उ॒दर॑-म॒न्तरि॑क्षं पा॒यु-र्द्यावा॑-पृथि॒वी,
आ॒ण्डौ ग्रावा॒ शेप॒स्-सोमो॒ रेतो॒ यज्ञ॑ञ्-ज॒भ्यते॒
तद्-विद्यो॑तते॒ यद्-वि॑धू-नु॒ते तथ्स्त॑-नयति॒ यन्मे-ह॑ति॒
तद्-व॑र्षति॒ वागे॒-वाऽस्य॒ वाग-ह॒र्वा, अश्व॑स्य॒
जाय॑-मानस्य महि॒मा पु॒रस्ता᳚-ज्जायते॒ रात्रि॑-रेनं महि॒मा
प॒श्चा-दनु॑-जायत ए॒तौ वै म॑हि॒माना॒-वश्व॑-म॒भित॒ः
सम्ब॑भूव-तु॒र॒हयो॑ दे॒वान॑-वह॒-दर्वा-ऽसु॑रान्,
वा॒जी ग॑न्ध॒र्वा-नश्वो॑ मनु॒ष्या᳚न्-थ्समु॒द्रो वा,
अश्व॑स्य॒ योनि॑स्-समु॒द्रो बन्धु॑ः॥

## तैत्तिरीय ब्राह्मणम् 3-9 ( अश्वमेधम् 2 )

यद्-द॑र्श-पूर्ण-मा॒सौ यज॑ते।
अश्व॑स्यै॒व मेध्य॑स्य प॒दे प॑दे जुहोति।
ए॒तद॑नु-कृति ह स्म॒ वै पु॒रा।
अश्व॑स्य॒ मेध्य॑स्य प॒दे प॑दे जुह्वति।
यो वा, अश्व॑स्य॒ मेध्य॑स्य वि॒वर्त॑नं॒ वेद॑।

अश्वंस्यैव मेध्यंस्य विवर्तने विवर्तने जुहोति।
असौ वा, आंदित्योऽश्वंः।
स आंहव-नीय-मागंच्छति।
तद्-विवंर्तते।
यदंग्नि-होत्रं जुहोतिं।
अश्वंस्यैव मेध्यंस्य विवर्तने विवर्तने जुहोति।
एतदंनु-कृति ह स्म वै पुरा।
अश्वंस्य मेध्यंस्य विवर्तने विवर्तने जुह्वति॥

**आरण्यकम् 5**

यदेंका-दशेऽहंन् प्रवृज्यतें।
इन्द्रों भूत्वा त्रिष्टुभं-मेति।
यद्-द्वांदशेऽहंन् प्रवृज्यतें।
सोमों भूत्वा सुत्या-मेंति।
यत्पुरस्तां-दुपसदां प्रवृज्यतें।
तस्मां-दितः परांङ्मून्-लोकाग्स्-तपंन्नेति।
यदु-परिंष्टा-दुपसदां प्रवृज्यतें।
तस्मां-दमुतो-र्वाङिमान्-लोकाग्स्-तपंन्नेति।
य एवं वेदं।
ऐव तंपति॥

## तैत्तिरीय ब्राह्मणम् 3-9 ( काठकम् 3 )

तस्यै॒-वात्मा प॑द॒-वित्तं वि॑दित्वा।
न कर्म॑णा लिप्यते॒ पाप॑केन।
पञ्च॑-पञ्चा॒-शत॑स्-त्रि॒वृत॑ः संवथ्स॒राः।
पञ्च॑-पञ्चा॒-शत॑ः पञ्चद॒शाः।
पञ्च॑-पञ्चा॒शत॑ः सप्त-द॒शाः।
पञ्च॑-पञ्चा॒शत॑ एक-वि॒ग्ं॒शाः।
वि॒श्व॒-सृजाग्ं॑ स॒हस्र॑-संवथ्सरम्।
ए॒तेन॒ वै वि॑श्व॒-सृज॑ इ॒दं विश्व॑म-सृजन्त।
यद्-विश्व॒म-सृ॑जन्त।
तस्मा॑द्-विश्व॒सृज॑ः।
विश्व॑-मेना॒-नन॒ु प्रजा॑यते।
ब्रह्म॑ण॒ः सायु॑ज्यग्ं सलो॒कता॑ यन्ति।
ए॒ता-सा॑मे॒व दे॒वता॑-ना॒ग्ं॒ सायु॑ज्यम्।
सा॒र्ष्टिताग्ं॑ समान-लो॒कता॑ यन्ति।
य ए॒त-द॑ुप॒-यन्ति॑।
ये चै॑न॒त्-प्राहु॑ः।
येभ्य॑श्-चैन॒त्-प्राहु॑ः।
ओम्॥

## तैत्तिरीयोपनिषदि चतुर्थः प्रश्नः

तस्यै॒वं वि॒दुषो᳚ य॒ज्ञस्-या॒त्मा यज॑मानश्-श्र॒द्धा
पत्नी॒ शरी॑र-मि॒ध्म-मुरो॒ वेदि॒-र्लोमा॑नि ब॒र्॒हि-र्वे॒दश्-शिखा॒
हृद॑यं॒ यूप॒ः काम॒ आज्यं॑ म॒न्युः
प॒शुस्-तपो॒ऽग्निश्-श॑मयि॒ता दक्षि॑णा॒ वाग्घोता᳚
प्रा॒ण उ॑द्गा॒ता चक्षु॑-रध्व॒र्यु-र्मनो॒ ब्रह्मा॒
श्रोत्र॑-म॒ग्नी-द्याव॒द्-ध्रिय॑ते॒ सा दी॒क्षा यद॑श्ञा॑ति॒
यत्पिब॑ति॒ तद॑स्य सोमपा॒नं यद्रम॑ते॒ तदु॑प॒-सदो॒
यथ्स॒ञ्चर॑त्-युप॒विश॑त्-यु॒त्तिष्ठ॑ते च॒ स प्र॑व॒र्ग्यो॑
यन्मुखं॒ तदा॑हव॒-नीयो॒ यद॑स्य वि॒ज्ञानं॒ तज्जु॒होति॒
यथ्सा॒यं प्रा॒तर॑त्ति॒ तथ्स॒मिधो॒ यथ्सा॒यं
प्रा॒त-र्म॒ध्यन्दि॑नं च॒ तानि॒ सव॑नानि॒ ये, अ॑होरा॒त्रे ते
द॑र्शपूर्ण-मा॒सौ यें᳚ऽर्ध-मा॒साश्च॒ मासा᳚श्च॒ ते
चा॑तु-र्मा॒स्यानि॒ य ऋ॒त-व॒स्ते प॑शु-ब॒न्धा ये
सं॑वथ्स॒राश्च॑ परिव-थ्स॒राश्च॒ तेऽह॑र्ग॒णास्-स॑र्व-वेद॒सं
वा, ए॒तथ्स॒त्रं यन्मर॑णं॒ तद॑व॒-भृथ॑ ए॒तद्वै
ज॑रामर्य-मग्नि-हो॒त्रग्ं स॒त्रं य ए॒वं वि॒द्वा-नु॒द॒-गय॑ने
प्र॒मीय॑ते दे॒वा-ना॑मे॒व म॑हि॒मानं॑ ग॒त्वा-ऽऽदि॒त्यस्य॒
सायु॑ज्यं गच्छ॒त्-यथ॒ यो द॑क्षि॒णे प्र॒मीय॑ते पितृ॒णामे॒व
म॑हि॒मानं॑ ग॒त्वा च॒न्द्रम॑स॒स्-सायु॑ज्यं गच्छ॒त्-ये॒तौ
वै सू᳚र्या चन्द्र॒मसो᳚-र्महि॒मानौ᳚ ब्रा॒ह्म॒णो

वि॒द्वा-न॒भि-जं॑यति॒ तस्मा॒॑द् ब्र॒ह्मणो॑ महि॒मानं॑-माप्नोति॒
तस्मा॒॑द् ब्र॒ह्मणो॑ महि॒मानं॑-मित्युप॒-निषं॑त्॥ **80**॥

**॥ इति वेदादि शाट्टुमुऱै समाप्तम्॥**